नान्यैर्नान्यावसायिभिः" मनुः। २ कृतलेपने ३ समन्तात् लिप्ते च

**अवलीढ** त्रि० अव+लिह–क्त। १ भक्षिते २ कृतावलेहे ३ जिह्वाग्रेणास्वादिते ४ व्याप्ते च "अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणः" वेणी०। "पतत्त्रिणावलीढञ्च शुना संस्पृष्टमेव च" मनुः।

**अवलीला** स्त्री अवरा लीला। १ अनायासे २ अनादरे च।

**अवलुञ्चन** न० अव+लुन्च–ल्युट्। १ छेदने २ उत्पाटने ३ केशादेरबन्धने ४ अपनयने "दूराद्रुजो व्रणौष्ठस्य सन्निकृष्टेऽवलुञ्चनम्" च। सुश्रु०। [अकृतबन्धने च।

**अवलुञ्चित** त्रि० अव+लुन्च+क्त। उत्पाटिते अपनीते

**अवलुण्ठन** न० अव+लुठि–भावे ल्युट्। भूमौ पतित्वा परिवर्त्तने (लोटा)।

**अवलेख** पु० अव+लिख भेदने भावे घञ्। अवभेदने "वंशावलेखसंयुक्ते मूले चाजाविके भिषक्" सुश्रु०।

**अवलेप** पु० अव+लिप् भावे घञ्। १ गर्व्वे "प्रियसङ्गमेष्वनवलेपमदाः" माघः बलावलेपादधुनापि पूर्व्ववत्" माघः। "ऐरावतमदावलेपलग्नापारिजातशाखा" काद०। २ लेपने ३ भूषणे ४ सम्बन्धे च।

**अवलेपन** न० अव+लिप–भावे ल्युट्। १ विलेपे, २ म्रक्षणे, ३ सम्बन्धे ४ गर्व्वे च। करणे ल्युट्। ५ चन्दनादौ।

**अवलेह** पु० अव+लिह–घञ्। १ जिह्वाग्रेणास्वादने। कर्म्मणि घञ्। २ तदास्वाद्ये औषधादौ च। "अतोऽवलेहान्वक्ष्यामः खदिरासननिम्बराजवृक्षशालसारक्वाथे तत्सारपिण्डान् सूक्ष्मपिष्टान् प्रक्षिप्य विपचेत् ततो नातिद्रवं नातिसान्द्रमवतार्य्य तस्य पाणितलपूर्णमप्रातराशोमधुमिश्रं लिह्याद् देवं सालसारादौ न्यग्रोधारग्वधादौ च लेहान्कारयेत्" इति सुश्रु०। [र्थे मधुप्रभृतौ द्रव्ये।

**अवलेह्य** त्रि० अव+लिह–कर्म्मणि ण्यत्। जिह्वाग्रेण आस्वा-

**अवलोक** पु० अव+लुक–लोक–वा घञ्। दर्शने चाक्षुषज्ञाने "कुम्भाङ्कभङ्गनयनमीलनाङ्गावलोककृत्" सा०द०।

**अवलोकन** न० अव+लुक–लोक–वा ल्युट्। १ दर्शने, २ अनुसन्धाने च। "न बभुवुरवलोकनक्षमाः" रघुः। करणे ल्युट्। ३ आलोके, ४ नेत्रे च। योगनिद्रान्तविषदैः पावनैरवलोकनैः" रघुः।

**अवलोकित** त्रि० अव+लोक–अर्म्मणि क्त। १ दृष्टे। भावे क्त। २ दर्शने न०। ततोऽस्त्यर्थे अच् ३ बुद्धभेदे पु०।

**अवलोकिन्** त्रि० अव+लुक–लोक वा णिनि स्त्रियां ङीप्। वीक्षके दर्शके "तव प्रियं यच्चतुरावलोकिणः" कुमा०।

**अवलोप** पु० अव+लुप–घञ्। १ खण्डने २ नाशने ३ विलोपने "यदधयदधरावलोपन्दल्यत्" माघः। [अनुकूले।

**अवलोम** पु० अवनद्धं लोम आनुकूल्यम् प्रा०त० अच् समा०।

**अवल्गुज** पु० अवल्गोरशोभनाज्जायते जन–ड। १ सोमराजीलतायाम्। (हाकुच) २ असाधुजाते त्रि०।

**अववर्षण** न० अव+वृष–भावे ल्युट्। कृत्स्नवर्षणे। "स्नप्नदीतरणाववर्षणामेध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्य्यत्वात्" कात्या० १।७।१२। 'तथा नदीं दृष्टिञ्च कृत्स्नामेवाभिसन्धाय मन्त्रं प्रयुङ्क्ते न चावान्तरनिद्रं नाप्येकं स्रोतः, नाप्येकां वर्षधाराम् तस्मात् सकृत्प्रयोगः तत्र नदीसन्तरणे स्रोतसां भेदेऽपि नदीद्रव्यैकत्वात् सकृन्मन्त्रः अववर्षणे कालैकत्वादेव" कर्कः।

**अववाद** पु० अव+वद–घञ्। १ निन्दायाम्, २ विश्वासे, ३ अवज्ञायाम्, ४ अवलम्बने च।

**अवश** त्रि० नास्ति वशमायत्तत्वं यस्य। १ अस्वाधीने, २ कामादिपरवशे, ३ पराधीने च। "जगध्वाह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः" मनुः। कार्य्यतेऽह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः" "कार्य्यतेऽह्यवशोऽपि सन्" इति च गीता।

**अवशस्** त्रि० अव+शन्स–क्विप्। अववादे अवशंसने "अवशसा निःशसा यत् पराशसो पारिम जाग्रतो यत्स्वपन्तः" अथ० ६।४५।२।

**अवशातन** न० अव+शद–णिच्–तङ् ल्युट्। १ नाशने २ शीर्णताकरणे। "मांसानामवशातनं श्वयथूदं शकोथ" इति सुस्रुतः

**अवशिरस्** त्रि० अवनतं शिरोऽस्य प्रा०ब०। अवाङ्मस्तके।

**अवशिष्ट** त्रि० अव+शिष–क्त। १ अतिरिक्ते, २ परिशिष्टे, ३ अधिके च। "सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम्" या० स्मृ० "वाजिभ्योवाजिनमिति श्रुतौ वाजिनं आमिक्षावशिष्टं जलमिति रघु०।

**अवशीभूत** त्रि०न वशीभूतः। अनायत्ते। अवशीकृतोऽप्यत्र।

**अवशीर्ष**(क) त्रि० अवनतं शीर्षं यस्य वा कप्। १ अवाङ्मस्तके। अवाक्शीर्षाख्ये सुस्रुतोक्ते २ शय्यादोषभेदे पु० "अवाक्शीर्षे दीर्घन्युब्जोत्तानसङ्कुचितदेहस्थिततादृक्षिणपार्श्वशायिनः प्रदानमिति सप्त शय्यादोषा" इति। ३ नेत्ररोगभेदे नेत्रव्यापदोऽभिधाय 'अतिपीड़ितवह्नोषान् विधिं चाप्यवशीर्षके" इति सुस्रुतः।

**अवशेष** पु० न० अव+शिष–भावे घञ्। १ कृतपदार्थस्य शेषे २ समाप्तौ च "तोयावशेषेण हिमाभमभ्रम्" भट्टिः कर्म्मणि घञ्। अवशिष्टे।